स्वल्प:, त्रि, (सुष्ठु अल्प: ।) अत्यल्प: । यथा,—
"नेहातिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भयात् ॥"
इति भगवद्गीतायाम् । २ । ४० ॥

स्वल्पकेशरी, [न्] पुं, (स्वल्प: केशरोऽस्यास्तीति । इनि: ।) कोविदार: । इति राजनिर्घण्ट: ॥
(पर्य्यायोऽस्य यथा,—
"कोविदारश्चमरिक: कुद्दालो युगपत्रक: ।
कुण्डली ताम्रपुष्पश्च अश्मन्तक: स्वल्पकेशरी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

स्वल्पकेशी, [न्] पुं, (स्वल्प: केशोऽस्यास्तीति । इनि: ।) भूतकेश: । यथा,—
"गोलोमी स्वल्पकेशी च भूतकेशस्य केशपृक् ॥"
इति शब्दचन्द्रिका ॥
अत्यल्पकेशविशिष्टे, त्रि ॥

स्वल्पपत्रक:, पुं, (स्वल्पानि पत्राणि यस्य । कप् ।) गौरशाक: । स तु मधूकभेद: । यथा,—
"गौरशाको मधुकोऽन्यो गिरिज: स्वल्पपत्रक: ॥"
इति रत्नमाला ॥

स्वल्पफला, स्त्री, (स्वल्पं फलं यस्या: ।) वपुषा-भेद: । तत्पर्य्याय: । कच्छूघ्नी २ आङ्गनाभिनी ३ ग्रीष्मभव: ४ विषघ्नी ५ कफघ्नी ६ अपरा-जिता ७ । अस्या गुणा: हपुषागुणतुल्या: ।
इति राजनिर्घण्ट: ॥

स्ववासिनी, स्त्री, (स्वस्मिन् पित्रालये वसतीति । वस + णिनि: । ङीप् ।) ऊढा अनूढा वा पितृ-गृहस्थिता । तत्पर्य्याय: । चिरिण्टी २ । इत्य-मर: ॥"द्वे ऊढायामनूढायां वा पितृगृहस्थिता-याम् । पितृकुलस्नेहात् चिरं एटति गच्छति चिरिण्टी । इट गतौ अन् मनौषादि: ।
'स्ववासिन्यां चिरिण्टी स्यात् द्वितीयवयसि स्त्रियाम् ॥'
इति रुद्र: ॥
चिरण्टीत्येके । स्वेषु ज्ञातिषु वसति स्ववासिनी ग्रहादिलाक्षिण्यम् । सुखेन वसति सुवासिनीति द्राविडा: ।" इत्यमरटीकायां भरत: ॥

स्ववीज:, पुं, (स्वं एव वीजं यस्य ।) आत्मा । इति शब्दरत्नावली ॥ निजकारणे स्वीयवीर्य्ये च क्ली ॥

स्वसा, [ऋ] स्त्री, (सुष्ठु अस्यते क्षिप्यते इति । सु + अस् + "सुञासिभ्यामृन् ।" उणा० २ । ९७ । इति ऋन् यणादेशश्च । भगिनी । इत्यमर: । २ । ६ । २९ ॥ (यथा, मनु: । २ । ५० ।
"मातरं वा स्वसारं वा मातुलां भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥")

स्वस्क, ङ गत्याम् । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, स्वस्कते । इति दुर्गा-दास: ॥

स्वस्ति, व्य, (सु + अस् + "सावसे: ।" उणा० ४ । १८० । इति ति: । बहुलवचनात् न भूभाव: ।) आशी: । क्षेमम् । (यथा, महाभारते । ३ । १६६ । १३ ।
"स्वस्ति प्राप्नुहि कौन्तेय काम्यकं पुनराश्रमम् ॥"
पुण्यादि । इत्यमर: । ३ । ३ । २४० ॥ आशी-राशीर्व्वाद: । क्षेमं निरुपद्रव: । पुण्यं पाप-प्रक्षालनम् । एषु । आदिना मङ्गलादौ च स्वस्ति । स्वस्ति मङ्गलाशीर्व्वादपापनिर्णेजनादि-ष्विति भागुरि: । इति भरत: ॥ दानस्वीकार-मन्त्र: । यथा, "ओमित्युक्त्वा प्रतिगृह्य स्वस्ती-त्युक्त्वा सावित्रीं पठित्वा कामस्तुतिं पठेत् ॥"
इति शुद्धितत्त्वम् ॥ तद्योगे चतुर्थी स्यात् । यथा,—
"स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नम: सते ॥"
इति मुग्धबोधव्याकरणम् ॥
(क्लीलिङ्गेऽपि दृश्यते । यथा, भागवते । ४ । २४ । ३३ ।
"जितं त आत्मविद्धुर्य्य स्वस्तये स्वस्तिरस्तु मे ।
भवता राधसा राद्धं सर्व्वस्मा आत्मने नम: ॥"
तथा च वाजसनेयसंहितायाम् । १३ । १८ ।
"स्वस्तिस्त्वाभियातु मह्या स्वस्त्या छर्दिषा शन्त-मेन ॥")

स्वस्तिक:, पुं, क्ली, (स्वस्ति क्षेमं कायति कथय-तीति । कै + क: ।) आढ्यानां गृहविशेष: । इत्यमर: । २ । २ । १० ॥ तस्य लक्षणं यथा,—
"स्वस्तिकं प्राङ्मुखं यत् स्यादलिन्दानुगतं भवेत् ।
तत्पार्श्वानुमतौ चान्यौ तत्पर्य्यन्तगतोऽपर: ॥"
इति भरतधृतव्याडि: ॥
अन्यदास्तुशब्दे द्रष्टव्यम् ॥ शितावरशाक: । इति राजनिर्घण्ट: ॥
("शितिवार: शितिवर: स्वस्तिक: सुनिषण्णक: ।
श्रीवारक: सूचिपत्र: पर्णक: कुक्कुट: शिखी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
योगाङ्गासनविशेष: । तस्य लक्षणं आसनशब्दे द्रष्टव्यम् ॥

स्वस्तिक:, पुं,(स्वस्ति क्षेमं कायतीति । कै + क:) मङ्गलद्रव्यम् । तत्तु तण्डुलचूर्णनिर्म्मितचिकोणा-काराधिवासद्रव्यम् । चतुष्पथ: । गृहभेद: । इति मेदिनी ॥ पिष्टकविकार: । रततालिक: । इति विश्व: ॥ जिनानां चतुर्व्विंशतिचिह्नान्त-र्गतचिह्नविशेष: । यथा,—
"हयो गजोऽश्व: प्लवग: क्रौञ्चोऽब्जं स्वस्तिक: शशी ।
मकर: श्रीवत्स: खड्गी महिषा सूकरस्तथा ॥
श्येनो वज्रं मृगश्छागो नद्यावर्त्तो घटोऽपि च ।
कूर्म्मो नीलोत्पलं शङ्ख: फणी सिंहोऽर्हतां ध्वजा: ॥"
इति हेमचन्द्र: ॥
रसोनक: । इति त्रिकाण्डशेष: । (सर्पफणा-स्थितनीलरेखाविशेष: । यथा, रामायणे । १ । १९५ ।
"शिरोभि: पृथुभिर्नागा व्यक्तस्वस्तिकलक्षणै: ।
वमन्त: पावकं घोरं ददृशुर्दशनै: शिला: ॥")

स्वस्तिमुख:, पुं, (स्वस्ति मुखे प्रथमे वदने वा यस्य ।) लेख: । ब्राह्मण: । वन्दिनि, त्रि । इति मेदिनी ॥

स्वस्तिवाचनं, क्ली, (स्वस्ति मङ्गलस्य वाचनम् ।) माङ्गल्यकर्म्मारम्भकालीनवक्ष्यमाणमन्त्रोच्चारण-पूर्ब्बकतण्डुलविकिरणम् । तन्मन्त्रो यथा । अमुक कर्म्मणि पुण्याहं भवन्तो ब्रुवन्तु । इत्युक्ते पुण्याहमिति ब्राह्मणैस्त्रिरुक्ते अमुककर्म्मणि ऋद्धिं भवन्तो ब्रुवन्तु । तत: ऋद्ध्यतामिति ब्राह्मणास्त्रिर्ब्रूयु: । एवं स्वस्ति भवन्तो ब्रुवन्तु । इत्युक्ते स्वस्ति इति ब्राह्मणास्त्रिर्ब्रूयु: । तत: ॥ स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति नस्तार्क्ष्योऽरिष्टनेमि: स्वस्ति नो वृहस्पतिर्दधातु ॥ इति पठित्वा तण्डुलान् विकिरेत् ॥ * ॥ प्रमाणं यथा, व्यास: ।
"सम्पूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ।
धर्म्ये कर्म्मणि माङ्गल्ये संग्रामाद्भुतदर्शने ॥"
धर्म्ये कर्म्मणि इति क्रममौनिर्द्दिगात् अमुक-कर्म्मणि स्वस्ति भवन्तो ब्रुवन्तु इति ब्रूयात् । यम: ।
"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययो: ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
अपि च ।
नन्द उवाच ।
"अलक्षितोऽस्मिन् रहसि मामकैरपि गोव्रजे ।
कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्ब्बकम् ॥"
इति श्रीभागवते १० स्कन्धे ८ अध्याय: ॥

स्वस्थ:, त्रि,(स्वस्मिन् तिष्ठतीति । स्व + स्था + क: । सुस्थ: । यथा,—
"दुर्गे स्मृता हरसि भीतिमशेषजन्तो:
स्वस्थै: स्मृता मतिमतीव शुभां ददासि ।"
इति देवीमाहात्म्यम् ॥
("स्वस्थस्यापि समधातूनां साम्यानुग्रहार्थमेव कुशला रसगुणानाहारविकारांश्च पर्य्यायेणो-पक्षत्युपयोक्तुम् । साक्षात्समाख्यातानेकप्रकार-भूयिष्ठांश्चोपयुञ्जानात्तद्विपरीतकरणलक्षणमभ्या-स्यातचेष्टया समभिच्छन्ति कर्त्तुम् । देश-कालात्मगुणविपरीतानां हि कर्म्मणां आहार-विकाराणाञ्च क्रमेणोपयोग: सम्यक् । सर्व्वाभि-योगोऽनुदीर्णानां सन्धारणमसन्धारणमुदीर्णा-नाञ्च गतिमतां साहसानाञ्च वर्ज्जनम् । स्वस्थ-वृत्तमेतद्धातूनां साम्यानुग्रहार्थमुपदिश्यते ।"
इति चरके शारीरस्थाने षष्ठेऽध्याये ॥ * ॥
"उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता ।
धीमता यदनुष्ठेयं तत् सर्व्वं संप्रवक्ष्यते ॥
तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम् ।
कनिष्ठिकापरीणाहमृज्वग्रथितमव्रणम् ॥"
इत्यादिकं सुश्रुते चिकित्सितस्थाने २४ अ: ॥
"समदोष: समाग्निश्च समधातुमलक्रिय: ।
प्रसन्नात्मेन्द्रियमना: स्वस्थ इत्यभिधीयते ॥"
इति च तत्रोत्तरतन्त्रे ६४ अध्याय: ॥)

स्वस्रीय:, पुं, (स्वसुरपत्यं पुमानिति । स्वसृ + "स्वसुश्छ: ।" ४ । १ । १४३ । इति छ: ।